International Journal of Sanskrit Research 2017; 3(1): 82-84

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2017; 3(1): 82-84
© 2017IJSR
www.anantaajournal.com
Received: 19-11-2016
Accepted: 20-12-2016

**Naveen Bhat**
PhD Student,
Rajiv Gandhi Campus Sringeri
Rastriya Sanskrit Sansthan,
Deemed University Delhi, India

**Correspondence**
**Naveen Bhat**
PhD Student,
Rajiv GandhiCampus Sringeri,
Rastriya Sanskrit Sansthan,
Deemed University Delhi, India

# नाट्यशास्त्रीय–वाचिकाभिनयः

**Naveen Bhat**

## प्रस्तावना

नाट्यशास्त्रीयग्रन्थेषु आङ्गिक–वाचिक–सात्विक–आहार्येति चतुर्विधाभिनयः उक्तः। तेषु वाचिकाभिनयः नटेन उपयुज्यमानानि कविना रचितानि काव्यनाटकादीनि। भाषाविषयकं ज्ञानं प्रदातुं व्याकरणालङ्कारछन्दसादीनि शास्त्राणि प्रवृत्तानि। तान् सर्वान् अधीत्यैव कविः काव्यं रचयति। तत् कविना सह नटेनापि शिक्षितव्यं वर्तते इति हेतोः भरतमुनेः नाट्यशास्त्रेऽपि चतुर्षु अध्यायेषु वाचिकाभिनयस्य विस्तृतं विवरणं दत्तं वर्तते। तमधिकृत्य लेखनेऽस्मिन् जिज्ञासा क्रियते।

प्रत्येकस्य मानवस्य आत्मनः स्वरूपम् आनन्द एवेति श्रुतिः व्याख्यात्येवम्– ″आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। अनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति। सैषा भार्गवी वारुणी विद्या“[i] इति। अतः प्रत्येकोऽपि मनुष्यः येन केन प्रयत्नेन स्वजीवने सर्वदा आनन्दं प्राप्तुं प्रयतते। तत्प्राप्तुंविद्यमानेषु अनेकेषु मार्गेषु काव्यरसास्वादः अन्यतमः। सहृदयैः अनुभूयमानः काव्यरसास्वादः ब्रह्मानन्दसहोदरः इत्युक्तं विश्वनाथेन ″सत्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः। वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः“[ii]॥ इति। यादृशं काव्यं केवलं पठनाय श्रवणाय च योग्यं भवति तादृशं काव्यं श्रव्यकाव्यम्। पठनश्रवणाभ्यां सह अभिनेतुमपि साध्यं काव्यं यद्वर्तते तत् दृश्यकाव्यम्। तस्य रूपकमिति नाम। तदप्युक्तं विश्वनाथेन ″दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्। दृश्यं तत्राभिनेयं तद्रूपारोपात्तु रूपकम् ॥“ [iii] इति। ″विनाविशेषं सर्वेषां नाट्यमित्यभिधीयते“ [iv] इति भामहोक्त्यनुसारं रूपकानां साधारणतया नाटकमित्यपि नामान्तरं वर्तते। नाट्यशास्त्रीयग्रन्थेषु नृत्यं नृत्तं तथा नाट्यञ्चेति प्रभेदाः दृश्यन्ते। तेषां लक्षणान्युक्तानि नन्दिकेश्वरेण. नाट्यं तन्नाटकं चैव पूज्यं पूर्वकथायुतम्। भावाभिनयहीनं तु नृत्तमित्यभिधीयते ॥ रसभावव्यञ्जनादियुक्तं नृत्यमित्यभिधीयते। एतन्नृत्यं महाराजसभायां कल्पयेत् सदा ॥ [v] इति। अनेन नाटकानि रूपकाणि वा नाट्यप्रकारे अन्तर्भवन्ति तथा भारतीय–शास्त्रीयनृत्यानि भरतनाट्य–मणिपुरि–कूचुपुडीत्यादीनि नृत्यप्रकारे चान्तर्भवन्ति। नृत्येषु श्रव्यकाव्यानां गद्यपद्यचम्पूनामपि उपयोगः साध्यः। अतः सर्वाणि काव्यानि पाठ्यं भवितुमर्हन्ति अपि च वाचिकाभिनये अन्तर्भवन्ति। तदेवोक्तं नन्दिकेश्वरेण ″वाचा विरचितः काव्यनाटकादितु वाचिकः“[vi] इति । अभीत्युपसर्गपूर्वकस्य णीञ्–प्रापणे इति धातोः अच्–प्रत्यययोगेन अभिनयशब्दः व्युत्पन्नः। तदुक्तं भरतमुनिनापि ″अभिपूर्वस्तु णीञ् धातुराभिमुख्यार्थनिर्णये। यस्मात् पदार्थान्नयति तस्मादभिनयः स्मृतः॥“ इति।″विभावयति यस्माच्च नानार्थान् हि प्रयोगतः। शाखाङ्गोपाङ्गसंयुक्तस्तस्मादभिनयः स्मृतः″ इत्यनेन तस्यार्थः विवृणीतः। तस्य प्रभेदाः″आङ्गिको वाचिकश्चौव ह्याहार्यः सात्त्विकस्तथा। ज्ञेयास्त्वभिनयो विप्राः चतुर्धा परिकल्पितः“ [vii] इति कथिताः। तत्राङ्गिकाभिनयः शिरोहस्तकटीवक्षपार्श्वपादादि अङ्गप्रत्यङ्गैः क्रियमाणः वर्तते। स्तम्भस्वेदरोमाञ्चस्वरभङ्गवेपथुवैवर्ण्याश्रुप्रलयाः अष्टौ सात्त्विकाभिनयाः। नेपथ्यजो विधिः तथा धार्यमाणानि किरीटहारकेयूराणि आयुधानि च आहार्याभिनयः इति कथ्यते। कविना रचितानि नटेनोपयुज्यामानानि काव्यनाटकादीन्येव वाचिकाभिनयः।

वागेव अभिनयः वाचिकाभिनयः। ″वागेव विश्वा भुवनानि जज्ञे″ इति श्रुतिः वाचः महत्त्वं प्रतिपादयतीति अभिनवगुप्तः उद्गिरति। दण्डी तु ″इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्। यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥“ [viii] इत्युक्त्वा शब्दः ज्योतिसदृशः इति भावयति। वाक्यपदीये आगमकाण्डे ″शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः। इत्यारभ्य तद्वशादभिनिष्पन्नं सर्वं वस्तु विभज्यते ॥″ इति पर्यन्तं षट्–कारिकासु वाचः सर्वस्वकारणत्वं प्रतिपादितं भर्तृहरिणा। तदेवोक्तं भरतमुनिनापि–वाङ्मयानीह शास्त्राणि वाङ्निष्ठानि तथैव च। तस्माद्वाचः परं नास्ति वाग् हि सर्वस्य कारणम्॥ [ix] इति। वागेव सकलनाट्यप्रयोगाणां आधारभूता वर्तते। आङ्गिकाहार्यसात्त्विकाभिनयाः वाचिकाभिनयमेव अनुसरन्ति। अतः वाचिकाभिनयः नाट्यस्य तनुः इत्यप्युक्तं भरतेन–″वाचि यत्नस्तु कर्तव्यो नाट्यस्येयं तनुः स्मृता।

आङ्गनेपथ्यसत्त्वानि वाक्यार्थं व्यञ्जयन्ति हि ॥" [x] इति। नाट्यशास्त्रस्य चतुर्दशाध्यायादारभ्य सप्तदशाध्यायपर्यन्तं चतुर्षु अध्यायेषु वाचिकाभिनयः विवृणीतः। तत्र व्याकरणं, छन्दांसि, वृत्तानि, षट्त्रिंशल्लक्षणानि,अलङ्काराः, काव्यदोषादि विचाराः चर्चिताः। तत्सारः समासेन विमृश्यतेऽत्र।

### व्याकरणम्

वर्णमाला– "अकाराद्या स्वरा ज्ञेया औकारान्ताश्चतुर्दशः। हकारान्तानि कादीनि व्यञ्जनानि विदुर्बुधाः"॥ तत्र स्वराश्चतुरदश– अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ इति। कादीनि व्यञ्जनानि यथा – क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व श ष स ह इति। वर्णोत्पत्ति स्थानानियथा– अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा। जिह्वामूलश्च दन्ताश्च नासिकौष्टौ च तालु च ॥ अग्रे विद्यमाने गद्ये तेषां विवरणम् एवं दत्तम् – अ कु ह विसर्जनीयाः कण्ठ्याः। इ चु य शास्तालव्याः। ऋ टु र षा मूर्धन्याः। ऌ तु ल सा दन्त्याः। उ पूपध्मानीया ओष्ठ्याः। ᳵप ᳵफ इति पफाभ्यां प्राक् अर्धविसर्गसदृशः उपध्मानीयाः। ᳲक ᳲख इति कखाभ्यां प्राक् अर्धविसर्गसदृशः जिह्वामूलीयः। ए ऐ कण्ठ्य–तालव्यौ। ओ औ कण्ठोष्ठ्यौ। वकारो दन्त्योष्ठ्यः। ङ ञ ण न मा अनुनासिकाः। विसर्जनीय औरस्य इत्येके। सर्ववर्णानां मुखं स्थानमित्यपरे। एवं वर्णोत्पत्तिस्थानानुक्त्वा अग्रे विवृतानां स्पष्टानां अन्तस्थानां संवृतानां ऊष्माणानां अन्तस्थानां जिह्वामूलीयानाम् उपध्मानीयानां स्वरितानां क्रम्यानां सवर्णसंज्ञानां विवरणं प्रदत्तम्। तदनन्तरं नामाख्यातोपसर्गनिपातप्रत्ययविभक्तिसन्धिसमासानां लक्षणान्युक्तानि। भरतोक्तवर्णमालायां स्वरेषु ॡइति दीर्घवर्णः अधिकः उक्तः। अयं वर्णः कोशेषूपलभ्यते वैदिकेषु मन्त्रन्यासेषु च। किन्तु पाणिन्यनुसारिणः तन्निराकुर्वन्ति। अकः सवर्णे दीर्घः इति सूत्रानुसारं अक् प्रत्याहारे विद्यमानानां पञ्चानां वर्णानामपि दीर्घः भवेदिति भाति। तच्चिन्त्यम्।

### छन्दोलक्षणम्

भरतमतानुसारं छन्दोहीनः शब्दः नास्ति। एवमेव शब्दहीनः छन्दोऽपि नास्ति। तस्मात् शब्दछन्दसोः संयोगः नाट्यस्य उद्योतकः भविष्यति। तादृशः छन्दः त्रिप्रकारकः समवृत्तम् अर्धसमवृत्तं तथा विषमवृत्तं चेति। तत्र समवृत्ते अक्षरसङ्ख्यानुसारं छन्दसां सङ्ख्या षड्विंशतिः। ताः एकाक्षरादारभ्य षड्विंशत्यक्षरपर्यन्ताःउक्ता, अत्युक्ता, मध्या, प्रतिष्ठा, सुप्रतिष्ठा, गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्तिः, त्रिष्टुप्, जगती, अतिजगती, शक्वरी, अतिशक्वरी, अष्टिः, अत्यष्टिः, धृतिः, अतिधृतिः, कृतिः, प्रकृतिः, आकृतिः, विकृतिः, सङ्कृतिः, अतिकृतिः, उत्कृतिश्च। षड्विंशत्यक्षरादधिकं मालावृत्तं इति कथितम्। वृत्तरत्नाकरादि छन्दश्शास्त्रग्रन्थेष्वपि एतासामेव छन्दसां नामोल्लेखः दृश्यते। तेषां वृत्तभेदानां सम्भवनीयसङ्ख्यापि उक्ता यथा गायत्र्यां ६४ वृत्तानि, उष्णिहि १२८, बृहत्यां ५१२, पङ्क्त्यां १०२४ एवमाहत्य १३४२१७७२६। पूर्वोक्तेषु नाट्ये उपयुज्यमानानि वृत्तानि पञ्चदशे अध्याये उक्तानि। तानि– तनुमध्या, मकरशीर्षा, मालिनी, मालती, उद्धता, भ्रमरमाला, सिंहलेखा, मत्तचेष्टितम्, विद्युन्माला, चित्रविलसितं, मधुकरी, उत्पलमाला, शिखिसारिणी, दोधकं, मोटकं, इन्द्रवज्रा, उपेन्द्रवज्रा, रथोद्धता, स्वागता, शालिनी, तोटकं, कुमुदप्रभा, कुमुदनिभा, चन्द्रलेखा, प्रमिताक्षरा, वंशस्था, हरिणप्लुता, कामदत्ता, अप्रमेया, पद्मिनी, पुटवृत्तं, प्रभावती, प्रहर्षिणी, मत्तमयूरकः, वसन्ततिलका, असम्बाधा, शरभा, नान्दीमुखी, मत्तेभललितं, प्रवरललितं, शिखरिणी, वृषभचेष्टितं, श्रीधरा, वंशपत्रपतितं, विलम्बितगतिः, चित्रलेखा, शार्दूलविक्रीडितं, सुरवदना, स्रग्धरा, मद्रकं, अश्वललितं, मेघमाला, क्रौञ्चपादी, भुजङ्गविज्रम्भितम्। एतैः सहविषमवृत्तलक्षणानि, अर्धसमवृत्तलक्षणानि चोक्तानि।

### लक्षणानि

काव्यबन्धेषु गुणालङ्कारवृत्तयः प्रसिद्धाः मार्गाः। भरतेनोक्तम् – षट्त्रिंशदेतानि हि लक्षणानि प्रोक्तानि वै भूषणसम्मितानि। काव्येषु भावार्थगतानि तज्ज्ञैः सम्यक्प्रयोज्यानि यथारसं तु ॥[xi] तानि लक्षणानि पाठद्वये उपलभ्यन्ते। एकः पाठः कीर्तिधर धनञ्जय सर्वेश्वरप्रभृतिभिः टीकाकारैः अङ्गीकृतःअन्यत्तु विश्वनाथ सिंहभूपालादिभिः। भोजराजस्तु पाठद्वयस्य समन्वयं कृत्वा अधिकानि द्वादशानि लक्षणानि संयोज्य चतुष्षष्ठिलक्षणानां विवेचनं करोति। शारदातनयोऽपि तमेवाङ्गीकरोति। द्वावपि पाठौ पश्यामः –

**प्रथमः पाठः** – विभूषणम्, अक्षरसङ्घातः, शोभा, अभिमानः, गुणकीर्तनं, प्रोत्साहनम्, उदाहरणं, निरुक्तं, गुणानुवादः, अतिशयः, हेतुः, सारूप्यं, मिथ्याध्यवसायः, सिद्धिः, पदोच्चयः, आक्रन्दः, मनोरथः, आख्यानं, याञ्चा , प्रतिषेधः, पृच्छा, दृष्टान्तः, निर्भासनं, संशयः, आशीः, प्रियवचनं, कपटं, क्षमा, प्राप्तिः, पश्चात्तापः, अनुवृत्तिः, उपपत्तिः, युक्तिः, कार्यम्, अनुनयः, परिदेवनम्।

**द्वितीयः पाठः** –भूषणम्, अक्षरसङ्घातः, शोभा, उदाहरणं, हेतुः, संशयः, दृष्टान्तः, प्राप्तिः, अभिप्रायः, निदर्शनं, निरुक्तं, सिद्धिः, विशेषणं, गुणातिपातः, अतिशयः, तुल्यतर्कः, पदोच्चयः, दृष्टम्, उपदिष्टं, विचारः, विपर्ययः, भ्रंशः, अनुनयः, माला, दाक्षिण्यं, गर्हणम्, अर्थापत्तिः, प्रसिद्धिः, पृच्छा, सारूप्यं, मनोरथः, लेशः, क्षोभः, गुणकीर्तनम्, अनुक्तसिद्धिः, प्रियोक्तिः।

### अलङ्काराः

चत्वारः अलङ्काराः उक्ताः भरतमुनिना। तदेवम्– उपमारूपकंचैव दीपकं यमकं तथा। अलङ्कारास्तु विज्ञेयाश्चत्वारो नाटकाश्रयाः[xii] ॥इति। तत्र उपमायां प्रशंसोपमा निन्दोपमा कल्पिता सदृशी किञ्चित्सदृशी इति पञ्चभेदाः सन्ति। दीपकं रूपकंचैव एकप्रकारकौ। यमकस्य दशप्रभेदाः – पादान्तयमकं, काञ्चीयमकं, समुद्गयमकं, विक्रान्तयमकं, चक्रवालयमकं, सन्दष्टयमकं, पादादियमकं, पादान्तयमकं, चतुर्व्यवसितं, मालायमकञ्चेति।

काव्यदोषाः उक्ताः – गूढार्थं, अर्थान्तरं, अर्थहीनं, भिन्नार्थं, एकार्थं, अभिप्लुतार्थं, न्यायादपेतं, विषमं, विसन्धिः, शब्दच्युतञ्चेति।

काव्यगुणाः चोक्ताः – श्लेषः, प्रसादः, समता, समाधिः, माधुर्यं, ओजः, सौकुमार्यम्, अर्थव्यक्तिः, उदारता, कान्तिः।

एवं त्रिषु अध्यायेषु संस्कृतस्य लक्षणमुक्त्वा सप्तदशाध्यास्य आदौ प्राकृतस्य लक्षणमुक्तम्। कमल अमल रेणु तरङ्ग लोल सलिल आदयः शब्दाः संस्कृते प्राकृते च समानं भवतीत्युक्त्वा संस्कृत भाषापेक्षया प्राकृतस्य व्यत्यासं कथयति। तदेवम्– "एतदेव विपर्यस्तं संस्कारगुणवर्जितम्। विज्ञेयं प्राकृतं पाठ्यं नानावस्था–न्तरात्मकम्" [xiii] ॥इति। संस्कृतस्य वर्णानि प्राकृते कथं रूपान्तराणि भवन्तीति सनियममुक्तम्। तद्भेदत्रयमुक्तं – समानशब्दं, विभ्रष्टं, देशीगतम् इति। चतुर्विधभाषाः – अतिभाषा आर्यभाषा जातिभाषा योन्यन्तरी भाषा चेति। देवानां तु अतिभाषा, भूभुजां तु आर्यभाषा, जातिभाषा तु विविधा, ग्रामारण्यपशूद्भवाः नानाविहङ्गजाः योन्यन्तरी भाषा इति। कुत्र संस्कृतस्य प्रयोगः कुत्र प्राकृतस्येति विवृणोति– धीरोद्धते धीरललिते धीरोधाते धीरशान्ते च संस्कृतं प्रयोज्यम्। एषामेव सर्वेषां नायकानां कारणव्यपदेशेन प्राकृतं संप्रयोज्यम्। दारिद्र्यात्, अध्ययनाभावात्, ऐश्वर्येण प्रमत्तानां अनधीतोत्तमानां च संस्कृतं न प्रयोजयेत् इत्यादयः नियमाः प्रदत्ताः। सप्तविधप्राकृतभाषाः – मागधी, आवन्तिका, प्राच्या, शौरसेनी, अर्धमागधी, बाह्लीका, दाक्षिणात्या च। विभाषाचोक्ता–शकारभीरचण्डालशबरद्रमिलान्ध्रजाः। हीना वनेचराणां च विभाषा नाटके स्मृताः [xiv]॥इति। देशभेदेन कुत्रचित् अक्षरप्राचुर्यं दृश्यते। तद्यथा नकारबहुलाभाषा, चकारबहुलाभाषा, उकारबहुलाभाषा, ओकारबहुलाभाषा इत्यादयः। पात्राणां सम्भोदनाविधिः उक्तः। तद्यथा आर्येति ब्राह्मणं, महाराजेति राजानं, उपाध्यायेति आचार्यं, वृद्धं तात इत्यादिनियमाः उक्ताः। पाठ्यगुणाः एवमुक्ताः – सप्तस्वराः, त्रीणिस्थानानि, चत्वारो वर्णाः, द्विविधा काकुः, षडलङ्काराः, षडङ्गानि इति। तत्र सप्तस्वराणां रसेषु विनियोगः कथं भवतीति उक्तः। उरः कण्ठः शिरः इति त्रीणि स्थानानि।

उदात्तानुदात्तस्वरितकम्पिताः चत्वारो वर्णाः। साकाङ्क्षा निरकाङ्क्षा चेति द्विविधा काकुः। षडलङ्काराः यथा – उच्चः दीप्तः मन्द्रः नीचः द्रुतः विलम्बितश्च।षडङ्गानि यथा विच्छेदः अर्पणं विसर्गः अनुबन्धः दीपनं प्रशमनं चेति। एतेषां सर्वेषां विवरणं विस्तृततया प्रदत्तम्। किन्तु अध्यायान्ते पुष्पिकायां "इति भारतीये नाट्यशास्त्रे वागभिनये काकुस्वरव्यञ्जनो नाम सप्तदशोध्यायः" इति वर्तते। अनेन ज्ञायते यत् भरतमुनिः अस्मिन्नध्याये काकुरेव प्रधानमिति मन्यते इति।अभिनवगुप्तोपि एवमेव अङ्गीकरोति।

इत्थं भरतमुनिप्रणीते नाट्यशास्त्रे चतुर्दशाध्यायादारभ्य सप्तदशाध्यायपर्यन्तं कविशिक्षार्थं नटशिक्षार्थञ्च वाचिकाभिनयस्य साङ्गोपाङ्गविश्लेषणं कृतं वर्तते। अभिनेतारः चतुर्विधाभिनयेषु आङ्गिकाभिनयस्य अध्ययनार्थं प्रामुख्यतां ददति। सात्विकाभिनयाः अभ्यासेन न सिध्यन्ति परन्तु यदा अनुकर्ता अभिनेता अनुकार्यानां रामरावणादीनां अवस्थां स्वयमेवानुभवति तदा स्तम्भस्वेदादयः प्रादुर्भवन्ति। नेपथ्यजविधिः हारकेयूरादयः अहार्याभिनयः अन्येषां साहाय्येनापि लभ्यः भवति। किन्तु आङ्गिकाभिनयेन सह नाट्यस्य तनोः वाचिकाभिनयस्यापि अध्ययनम् अभिनेतृभिः करणीयमेव। अभिनवगुप्तोऽपि "अत्र हेतुमाह वाचि यत्नस्तु कर्तव्य इति कविना निर्माणकाले नटेन प्रयोगकाले" इति वदन् यथा कविः व्याकरणालङ्कारछन्दसादीनि अधीत्यैव काव्यनिर्माणं करोति तथा अभिनेतापि तत्प्रयोगकाले एतानि शास्त्राण्यधीत्यैव अभिनयेदिति आशास्ते। तेषु शास्त्रेषु विद्यमानानि विषयान् सङ्क्षेपेण सङ्ग्रह्य कुत्रचित् ततोऽधिकं विवरणं प्रददाति नाट्यशास्त्रम्। अतः कविभ्यः अपि पूर्वोक्तशास्त्रज्ञाने सत्यपि काव्यनिर्माणकाले नाट्यशास्त्रस्य अध्ययनम् वरम्। कालिदासादयः प्रसिद्धकवयोऽपि भरतमुनेः नामोल्लेखेन नाट्यशास्त्रस्य वाचिकाभिनयस्य प्रामुख्यतां प्रत्यपादयन्। नाट्यशास्त्रीयवाचिकाभिनयस्य अनुसन्धानेन रचितानि काव्यानि यदा नटोऽपि तदनुसन्धायैव नाट्ये नृत्ये वा योजयति तदैव रसनिष्पत्तेः पूर्णता सिध्यति॥

## संदर्भ सूची


1. भरतमुनेः नाट्यशास्त्रम् अभिनवगुप्तकृताभिनवभारत्या सह, सम्पादकः व्याख्याकारश्च डा।।पारसनाथद्विवेदी, सम्पूर्णानन्द संस्कृत विश्वविद्यालयः वारणसी, २००४
2. नन्दिकेश्वरकृतं अभिनयदर्पणम्, सम्पादकः मनमोहनघोषः, कल्कत्ता संस्कृत सीरीज्, १६३४
3. विश्वनाथकृतम् साहित्यदर्पणः , सम्पादकः शेषराजशर्मा, चौकाम्बा संस्कृतसीरीज् ओफीस् –२०१२
4. दण्डिनः काव्यादर्शः, सम्पादकौ–एस्.के.बेल्वल्करः अपि च रङ्गाचार्यः, बोम्बायी संस्कृत एण्ड् प्राकृत सीरीज्,१६२०
5. भामहकृत–काव्यालङ्कारः, सम्पादकः रमानन्दशर्मा, चौकाम्बा संस्कृतसीरीज्, २०१०


---

[i]तैत्तरीयभृगुवल्ली

[ii]साहित्यदर्पणः परिच्छेद–३ श्लो–२

[iii]साहित्यदर्पणः परिच्छेद–६

[iv]भामहकाव्यालङ्कारः

[v]अभिनयदर्पणम् श्लो–१५,१६

[vi]अभिनयदर्पणम्श्लो–३६

[vii]नाट्यशास्त्रम् अ–८

[viii]काव्यादर्शः परि–१ श्लो–४

[ix]नाट्यशास्त्रम् अ–१४

[x]नाट्यशास्त्रम् अ–१४

[xi]नाट्यशास्त्रम् अ–१६ श्लो–४

[xii]नाट्यशास्त्रम् अ–१६ श्लो–४०

[xiii]नाट्यशास्त्रम् अ–१७

[xiv]नाट्यशास्त्रम् अ–१७